मादित्य यतः प्रोक्तमेतदण्डं त्वयादितिम् ॥
तस्मान्मुने ! सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति ॥
सूर्य्याधिकारञ्च विभुर्जगत्येव करिष्यति ।
हनिष्यत्यसुरांश्चायं यज्ञभागहरानरीन् ॥
देवा निशम्येति वचो गगनात् समुपागतम् ।
प्रहर्षमतुलं याता दानवाश्च हतौजसः ॥
ततो युद्धाय दैतेयानाजुहाव शतक्रतुः ।
सह देवैर्मुदायुक्तो दानवाश्च तमाययुः ॥
तेषां युद्धमभूद्घोरं देवानामसुरैः सह ।
शस्त्रास्त्रदीप्तिसन्दीप्तसमस्तभुवनान्तरम् ॥
तस्मिन् युद्धे भगवता मार्त्तण्डेन निरीक्षिताः ।
तेजसा दह्यमानास्तु भस्मीभूता महासुराः ॥
ततः प्रहर्षमतुलं प्रापुः सर्व्वे दिवौकसः ॥
तुष्टुवुस्तेजसां योनिं मार्त्तण्डमदितिन्तथा ॥
स्वाधिकारं ततः प्रापुर्यज्ञभागांश्च पूर्व्ववत् ।
भगवानपि मार्त्तण्डः स्वाधिकारमथाकरोत् ॥
कदम्बपुष्पवद्भास्वानधश्चोर्द्ध्व रश्मिभिः ।
वृतोऽग्निपिण्डसदृशो दध्रे नातिस्फुटं वपुः ॥”

इति मार्कण्डेयपुराणे सूर्य्यमाहात्म्ये मार्त्तण्डोत्पत्तिनामाध्यायः ॥

मार्त्तण्डवल्लभा, स्त्री, ( मार्त्तण्डस्य वल्लभा प्रिया । यद्वा, मार्त्तण्डो वल्लभः प्रियोऽस्याः ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥ सूर्य्यपत्नी च ॥

मार्त्तिकः, पुं, ( मृत्तिकाया विकार इति । मृत्तिका+“तस्य विकारः ।” ४ । ३ । १३४ । इति ठक् । ) शरावः । इति शब्दरत्नावली ॥ मृत्तिकानिर्म्मिते, त्रि ॥

मार्द्दङ्गं, क्ली, ( मृत् अङ्गमस्य । ततः स्वार्थे अण् । ) पत्तनम् । इति हारावली ॥ ( मृदङ्गवादनं शिल्पमस्येति । अण् । ) मृदङ्गवादके, त्रि ॥

मार्द्दङ्गिकः, त्रि, ( मृदङ्गवादनं शिल्पमस्य । मृदङ्ग+“शिल्पम् ।” ४ । ४ । ५५ । इति ठक् । ) मृदङ्गवादकः । तत्पर्य्यायः । मौरजिकः २ । इत्यमरः । २।१०।१२ ॥ मार्द्दङ्गिकः ३ मौर्दङ्गिकः ४ । इति शब्दरत्नावली ॥ ( यथा, रामायणे । २ । ९१ । ४९ ।
“विल्वा मार्द्दङ्गिका आसंश्शम्याग्राहा विभीतकाः ।
अश्वत्था नर्त्तकाश्चासन् भरद्वाजस्य तेजसा ॥”)

मार्द्दवं, क्ली, (मृदोर्भाव इति । मृदु+“पृथ्वादिभ्य इमनिज् वा ।”५।१।१२२। इत्यच । “वावचनमण्वादेः समावेशार्थम् ।” इति काशिकोक्तेरण् । ) परदुःखप्रदर्शनात् पीड़ाबुद्धिः । मृदुता । यथा,—
“मार्द्दवं कोमलस्यापि संस्पर्शासहतोच्यते ।
उत्तमं मध्यमं प्रोक्तं कनिष्ठञ्चेति तत्त्रिधा ॥”
उत्तमं यथा,—
“अभिनवमालिकामियं सायम्-
नववंशिराधिका विशिश्ये ।
न कुसुमपटलं दरापि जग्धौ
तदनुभवात्तनुरेव सव्रणासीत् ॥”

मध्यमं यथा,—
“चित्रं धनिष्ठे तनुवाससोऽपि
चीनस्य पीनस्तनि ! सङ्गमेन ।
लिप्तेन तल्लोहितचन्दनेन
मूर्त्तिर्दिदूना सखि ! लोहितासीत् ॥
कनिष्ठं यथा,—
रससुधाकरे आमोदमामोदन-
मादधानं निलीननीलालकचञ्चरीकम् ।
क्षणेन पद्मास्यखपद्ममासीत्
त्विषा रवेः कोमलयापि ताम्रम् ॥”
इत्युज्ज्वलनीलमणिः ॥
( अकाठिन्यम् । यथा, रघौ । ८ । ४३ ।
“विललाप सवाष्पगद्गदं
सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्द्दवं
भजते कैव कथा शरीरिषु ॥”)

मार्द्दवः, पुं, (मार्द्दवं मृदुत्वमस्यास्तीति । मार्द्दव+अर्श आद्यच् । ) वर्णसङ्करजातिविशेषः ।
“माधुको मार्द्दवश्चञ्चुकारश्च च्छिक्किकादयः ।”
इति जटाधरः ॥

मार्षः, पुं, ( मृष्यति क्षमते जनानिति । मृष्+“इगुपधज्ञाप्रीकिरः कः ।” ३ । १ । १३५ । इति कः । मृषः । ततः । स्वार्थे अण् । ) नाट्योक्तौ श्रेष्ठः । इति हेमचन्द्रः । २ । २४ ॥ मारिषशाकः । इत्यमरटीकायां भरतः ॥ ( शाकार्थे पर्य्यायो यथा,—
“मारिषो वाष्पको मार्षः श्वेतो रक्तश्च स स्मृतः ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मार्षिकः, पुं, ( मार्ष+ठक् । ) मारिषशाकः । इति राजनिर्घण्टः ॥

मार्ष्टिः, स्त्री, ( मृज्+क्तिन् । “मृजेर्वृद्धिः ।” ७ । २ । ११४ । इति वृद्धिः । ) मार्ज्जनम् । इत्यमरः । २।६।१२१ ॥ तैलमर्द्दनम् । यथा,
“तैलमर्द्दं यदङ्गेषु न भवेत् बाहुसङ्गतम् ।
सा मार्ष्टिः पृथगभ्यङ्गो मस्तकादौ प्रकीर्त्तितः ॥”
इत्याह्निकतत्त्वम् ॥

मालं, क्ली, ( माति मानहेतुर्भवतीति । मा+“ऋज्रेन्द्राग्रवज्रेत्यादि ।”उणा० २ । २८ । इति रन् । पृषोदरादित्वाद्रस्य लत्वम् । ) क्षेत्रम् । इति मेदिनी ॥ ले, ४५ । (यथा, मेघदूते ।१६।
“सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥”) कपटम् । वनम् । इति हेमचन्द्रः ॥ ( हरितालम् । यथा,—
“हरितालं तालमालं मालं शैलूषभूषणम् ।
पिञ्जकं रोमहरणं तालकं पातमित्यपि ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे । )

मालः, पुं, (मातीति । मा+रन् । रस्य लत्वम् ।) जातिविशेषः । इति मेदिनी ॥ ले, ४५ । स च म्लेच्छजातिः । यथा,—
“माला भिल्लाः किरातास्च सर्व्वेऽपि म्लेच्छजातयः ॥”
( यथा, महाभारते । ६ । ९ । ३९ ।
“तत्रेमे कुरुपाञ्चालाः शाल्वा माद्रेयजाङ्गलाः ।
शूरसेनाः पुलिन्दाश्च बोधा मालास्तथैव च ॥”)
जनः । इति च हेमचन्द्रः । ३ । ५९८ ॥ देशविशेषः । स च मेदिनीपुरप्रदेशे मालभूमिरिति ख्यातः । विष्णुः । यथा,—
‘मा लक्ष्मीं लातीति मालो विष्णुः तं अततीति मालती ।’
इति मालतीशब्दटीकायां भरतः ॥

मालकं, क्ली, ( मलते धारयति शोभामिति । मलधारणे+ण्वुल् । ) स्थलपद्मम् । इति जटाधरः ॥

मालकः, पुं, ( मलते धारयत्युग्रवीर्य्यं रोगनाशने इति । मलधारणे+ण्वुल् ।) निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ ॥ (निम्बशब्देऽस्य विवरणं ज्ञातव्यम् ॥ )

मालका, स्त्री, (मलते धारयति शोभाम् । मल+ण्वुल् । स्त्रियां टाप् । ) माल्यम् । इति शब्दरत्नावली ॥

मालकौशः, पुं, ( मालस्य हरेः कोशात् कण्ठान्निर्गत इति । अण् । ) रागविशेषः । तस्य नामान्तरं कौशिकः । स च हनूमन्मते षड्रागाणां मध्ये द्वितीयरागः । हरस्य हरेर्वा कण्ठान्निर्गतः । अस्य जातिः सम्पूर्णा तत्र सप्तस्वरक्रमः स ऋ ग म प ध नि । अस्य ग्रहः षड्जस्वरः । शरदृतौ रात्रिशेषे गानसमयः । रागमालायामस्य स्वरूपम् । पाटलवर्णपुरुषः । नीलपरिच्छदः । यष्टिहस्तः । यौवनमदमत्तः स्त्रीभिः सह हास्यकौतुकान्वितः शुभ्रमस्तकमाल्यगलोऽथवा इन्दुसुक्तामाल्यगलः । अस्य रागिण्यः पञ्च यथा । टोड़ी १ गौरी २ गुणकरी ३ खम्भावती ४ कोकभा ५ । अस्याष्टौ पुत्त्रा यथा । मारुः १ मेवाड़ः २ बड़हंसः ३ प्रबलः ४ चन्द्रकः ५ नन्दः ६ भ्रमरः ७ खखरः ८ अत्र मिश्राङ्गोऽपि पाठः । भरतमते तस्य रागिण्यः पञ्च यथा । गौरी १ दयावती २ देवदाली ३ खम्भावती ४ कोकभा ५ । तन्मते अष्टौ पुत्त्रा यथा । गान्धारः १ शुद्धः २ मकरः ३ चिन्द्धनः ४ सहानः ५ शक्तिवल्लभः ६ मालीगौरः ७ कामोदः ८ । अष्टपुत्त्रभार्य्या यथा । धनाश्रीः १ मालश्रीः २ जयतश्रीः ३ सुघोरायी ४ दुर्गा ५ गान्धारी ६ भीमपलाश्री ७ कामोदी ८ । इति सङ्गीतशास्त्रम् ॥

मालचक्रकं, क्ली, ( माला सम्बद्धः अस्थामस्यस्येति । अर्श आदित्वादच् । स चक्रमिवेति । कन् । ) सक्थ्यूरुपर्व्वसन्धिः । इति शब्दचन्द्रिका । मालाइचाकि इति भाषा ॥

मालती, स्त्री, (मलते शोभां धारयतीति । मल+“भृदृशियजीत्यादि ।”उणा० ३ । ११० । इत्यच “बाहुलकात् मलतेरतच् । गौरादिनिपातनादुपधाया दीर्घत्वम् ।” इत्युज्ज्वलदत्तोक्तेः अतच् उपधाया दीर्घत्वम् ङीष् च । मां लक्ष्मीं